# Shri RuKmini Stavam

# શ્રીરુક્મિણીસ્તવમ્

## Document Information

Text title : Rukmini Stavanam 2

File name : rukmiNIstavanam2.itx

Category : devii, varadAnanda

Location : doc_devii

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Transliterated by : Arun Parlikar

Proofread by : Arun Parlikar

Description/comments : bhAvArchanA

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : June 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2023

*sanskritdocuments.org*

# શ્રીરુક્મિણીસ્તવમ્

ૐ શ્રી

॥ શ્રીશઙ્કર ॥

(ભુજઙ્ગપ્રયાત)

જગન્માતરં માતરં પદ્મજાદેઃ
    પરબ્રહ્મશક્તિં પરામપ્રમેયામ્ ।
અચિન્ત્યામનન્યામનાદ્યન્તરૂપામ્
    શુભાં રુક્મિણીં કૃષ્ણપત્નીં નમામિ ॥ ૧॥

સુમાન્યાં શરણ્યાં વરેણ્યાં વદાન્યામ્
    હરિપ્રાપ્તિધન્યાં વિદર્ભેશકન્યામ્ ।
સદા ચન્દ્રભાગાતટે વિષ્ટરસ્થામ્
    શુભાં રુક્મિણીં કૃષ્ણપત્નીં નમામિ ॥ ૨॥

વિભોર્વિઠ્ઠલસ્યાર્ધભાગે વસન્તીમ્
    સતીં પાણ્ડુરઙ્ગપ્રિયાં કોમલાઙ્ગીમ્ ।
શરચ્ચન્દ્રવિમ્બાનનાં દિવ્યકાન્તિમ્
    શુભાં રુક્મિણીં કૃષ્ણપત્નીં નમામિ ॥ ૩॥

યદીય પ્રભાવાત્ વિધિઃ સર્ગશક્તો
    જગત્પાલનેઽભૂદુપેન્દ્રઃ સમર્થઃ ।
લયે વ્યોમકેશોઽપિ તાં સાર્વભૌમામ્
    શુભાં રુક્મિણીં કૃષ્ણપત્નીં નમામિ ॥ ૪॥

કૃપાલેશતોઽસ્યા રવિર્ભાતિ લોકે
    ચકાસ્તિ પ્રભા વિદ્યુતઃ તારકાણામ્ ।
સુધાંશુઃ સદાઽઽહ્લાદકોઽનઙ્ગંસૂ તામ્
    શુભા રુક્મિણીં કૃષ્ણપત્નીં નમામિ ॥ ૫॥

શ્રુતિનામગમ્યાં સુભાવૈકગમ્યામ્
    મનોવાગતીતાં ચિદાનન્દસત્તામ્ ।
રમાં શારદાં પાર્વતીં સર્વમૂલામ્
    શુભાં રુક્મિણીં કૃષ્ણપત્નીં નમામિ ॥ ૬॥

ધરિત્રીં સવિત્રીં સમસ્યાદિકર્ત્રીમ્
    ત્રિલોકૈકધાત્રીં વરાં ભીમપુત્રીમ્ ।
ભવોત્પન્નભીશોકમોહાપહર્ત્રીમ્
    શુભાં રુક્મિણીં કૃષ્ણપત્નીં નમામિ ॥ ૭॥

લસન્મઞ્જુહાસ્યપ્રભાલઙ્કૃતોષ્ઠીમ્
    કટાક્ષે કૃપાર્દ્રાં પ્રિયોપેન્દ્રગોષ્ઠીમ્ ।
કટૌ ન્યસ્તહસ્તામનન્તાધિદેવીમ્
    શુભાં રુક્મિણીં કૃષ્ણપત્નીં નમામિ ॥ ૮॥

ઇતિ સ્વામી વરદાનન્દભારતીવિરચિતં શ્રીરુક્મિણીસ્તવં સમ્પૂર્ણમ્ ।

ભાવાર્ચના (પ્રાચાર્ય અ. દા. આઠવલે)

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Encoded and proofread by Arun Parlikar

*Shri RuKmini Stavam*

pdf was typeset on June 4, 2023

Please send corrections to *sanskrit@cheerful.com*